# ब्रेन इंटरनेशनल स्कूल

विषय - संस्कृत　　　　　　　　कक्षा -दश　　　　　　अभ्यास पत्र, नवंबर **2024-25**

प्रश्न **1** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।

पुरा वाराणस्यां कपूर्रपटको नाम रजकः आसीत्। तस्य गृहे एकः गर्दभः एकः कुक्कुरः च अवसताम्। गर्दभः भार वहति स्म। कुक्कुरश्च चौरेभ्यः गृहरक्षां करोति स्म। एकदा रात्रौ एकः चौरः द्रव्याणि हर्तुम् तस्य गृहं प्रविष्टः। गर्दभः श्वानम् अकथयत- " सखे! भवतः तावदयं व्यापारः तत्किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि?" कुक्कुरोऽवदत्- " भद्र! मम नियोगस्य चर्चा त्वया न कर्त्तव्या । किम् न जानासि यत् अहं अहर्निशम् तस्य गृहरक्षां करोमि। अयं च चिरान्निवृत्तः ममोपयोगं न जानानि। इदं श्रुत्वा गर्दभः अकथयत्-" त्व विपतौ स्वामिकार्यस्य उपेक्षा करोषि। भवतु तावत् यथा स्वामी जागरिष्यति तन्मया कर्त्तव्यम्" इत्युक्त्वा सः उच्चैः चीत्कारशब्द कृतवान्। ततः सः रजकः निद्राभङ्गकोपात् उत्थाय लगुडेन गर्दभः ताडयामास।

**I** एकपदेन उत्तरत-

i) कर्पूरपटको नाम रजकः कुत्र प्रतिवसति स्म?

ii) रजकस्य गृहे कः भारं वहति स्म?

**II** पूर्णवाक्येन उत्तरत-

i) राजकस्य गृहे कौ अवसताम्?

ii) रात्रौ गर्दभः श्वानम् किम् अकथयत्?

**III** भाषिक कार्यम्-

i) 'रात्रिन्दिवम्' इति अर्थे गंद्याशे किम् पदे प्रयुक्तम्? (रात्रौ / अहर्निशम् / उपेक्षां / निद्राभंगकोपात्)

ii) गद्यांशे 'वहति स्म' इति क्रियापदस्य किम् कर्तृपदं अस्ति? (कुक्कुरः/गर्दभः/रजकः/चौरः)

iii) 'अधुना' इत्यस्य विलोमपदम् अत्र किम्? (उच्चैः/यथा/पुरा/तावत्)

iv) 'त्वम्' विपत्तौ स्वामिकार्यस्य उपेक्षां करोषि'- अलम् त्वम् सर्वनामपदं कस्मै प्रयुक्तम्?
(गर्दभाय/रजकाय/चौराय/कुक्कुराय)

प्रश्न **2** भवान् स्निग्धः। नवप्रविष्टस्य वैदेशिकस्य प्राचार्यपुत्रस्य वर्णनं कुर्वन् अग्रजम् प्रति लिखितं पत्रं मंजूषायाम् प्रदत्तैः उचितपदैः पूरयित्वा पुनः लिखत।

नवोदय विद्यालय छात्रावासः

दिल्लीतः

दिनांङ्कः ............

**1** ..............अग्रजः भ्रातः

सादरं अभिवादनम्

अहम् अत्र **2**.............. अस्मि। अस्माकं दशमकक्षायां **3** .............. आगतः प्राचार्य महोदयस्य पुत्रः प्रविष्टः। सः तु अतीव अनुशासनप्रियः। अस्वच्छतां तु सः न **4** .............. एव। सः अतीवयोग्यः संस्कृतानुरागी च। सः वदति विदेशेषु सर्वे संस्कृतं **5** ............... उत्सुकाः। संस्कृते यानि ज्ञान रत्नानि सन्ति तानि **6** ............सन्ति। यदा भवान् अत्र आगमिष्यन्ति तदा तेन सह **7** ............... करिष्यामि। परिवारे **8** .............. मम प्रणामांजलि निवेदनीया।

भवताम् प्रियः **9**...........

**10**..............

परिचयः , स्निग्धः , समादरणीय , सहते , जीवनपयोगिनि , अनुजः , विदेशात् , पठितुम् ,सर्वेभ्यः , कुशली

प्रश्न **3** अधः प्रदत्तचित्रस्य वर्णनं मञ्जूषायाः सहायतया पञ्चसु वाक्येषु संस्कृतेन कुरुत। **(5)**



उपवनम्, बालिकाः,वृक्षाः , पादपाः ,प्रसन्नाः ,पञ्च ,अस्ति , सन्ति , क्रीडन्ति , कन्दुकेन , शोभन्ते , पर्वताः , पक्षिणः , आकाशे, पश्यन्ति , भ्रमन्ति , परिवेशः , सुंदरः

प्रश्न **4** निम्नलिखितं सवादं मञ्जूषायाः सहायतया रिक्तस्थानपूर्ति कृत्वा सम्पूरयत।

छात्रः - गुरुदेव! भवान् संस्कृतभाषायाः महत्त्वमुपरि किञ्चिद् वदतु ।

शिक्षकः - पुत्र! संस्कृतभाषा **1** ............।

छात्रः - भवान् इदं कथं कथयति यत् संस्कृतभाषां सर्वप्राचीना सर्वेत्कृष्टा च अस्ति?

शिक्षकः - प्रिय वत्स ! श्रुणु **2** ............।

छात्रः- इदं तु सत्यमस्ति यत् संस्कृतस्य व्याकरणं तु विशालतमं वर्तते।परम् एषा तु सर्वप्राचीना कथम्?

शिक्षकः- एतत् इदं **3**.................

छात्रः - गुरुदेव! विज्ञानक्षेत्रे कथम् इदम् ज्ञायते?

शिक्षकः- पुत्र! संसारस्य विज्ञाने ये शब्दाः प्रयुज्यते **4**............।

छात्रः - गुरुवर! अन्तरिक्षे विज्ञाने कथं संस्कृतशब्दाः साहाय्यं कुर्वन्ति।

शिक्षकः- **5**....................।

छात्रः- भवान् सत्यं वदतिअहम् अधुना अस्याः भाषायाः अध्ययनं प्राणपदेन करिष्यामि।

शिक्षकः - उत्तमम् । भवान् अग्रे वर्धतु।

सर्वप्राचीना सर्वोत्कृष्टा च अस्ति , पुत्र !अन्तरिक्षे तु गुरुत्वाकर्षण शून्यतया शब्दानां क्रमाः परिवर्तिता भवन्ति अतः अन्यानां भाषाणां अनेन अर्थाः पतिवर्तन्ते परं संस्कृतेन सह एतत् न भवति, संस्कृतस्य व्याकरणं तु विशालतमं वर्तते, ते तु पूर्वतः एव संस्कृतभाषायां सन्ति, यत् संस्कृतभाषायाः शब्दाः तु सर्वासु भाषासु तत्सम् तद्भव वा रूपेण सन्ति।

**प्रश्न 5 अधोलिखितं गद्याशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन्- "भो! किमिदम् उच्यते? न वयं स्वर्ग समानोपभोगान् विहाय अटव्यां क्षार तिक्त कषाय कटु रूक्षफलानि भक्षयिष्यामः।" तच्छुत्वा साश्रुनयनो यूथपतिः समद्गदम् उक्तवान्- "रसास्वाद लुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।

**I एकपदेन उत्तरत-**

क) कः वनं गन्तुम् उद्यतः भवति?

ख) कपयः केन उद्धताः आसन्?

**II पूर्णवाक्येन उत्तरत-**

क) साश्रुनयनो यूथपतिः समद्गदम् किम् उक्तवान्?

**III भाषिक कार्यम्-**

क) 'साश्रुनयनः' इति पदयोः किम् विशेषणपदम् ?

ख) 'रसास्वाद लुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ।' अस्मिन् वाक्ये 'जानीथ' इति क्रियापदस्य किम् कर्तृपदं अस्ति?